# गुणप्रकर्षो दिवसोऽयमागतः



बिपिनकुमारझा[1]

**भक्तत्राणपरायणा भवभयाऽभावं समातन्वती**
**या देवीह सुदर्शनं नृपमणिं संरक्ष्य युद्धे खरे ।**
**या चास्मै समुदात् स्वराज्यमखिलं स्वीयं हृतं शत्रुभिः**
**पायात् सा भुवनेश्वरी भगवती मां सर्वदा शर्मदा॥**

आराष्ट्रं साम्प्रतं भारतमातुश्चवन्दनायां, विश्ववन्धुत्वस्थापनायां, संसदि देववाणिपुनर्प्रतिस्थापनायां, लोकतन्त्रपर्वणः जयध्वजोत्तोलनोत्सवे च सल्लीनं दरीदृश्यते । एतदवसरे नागरिकाः अन्तर्मनस्थितं राष्ट्रोत्कर्षनिमित्तं भावं बहिर्भूतीकृत्य तच्छब्दैः सत्वप्रधानप्रकाशैश्चानन्दमनुभवन्ति रष्ट्रद्रोहिणमानन्दम् अपहरन्ति च । अनेन विधिना दिनानि दिनमणिना उन्नीयमानानि सन्ति । उल्लसितान् नागरिकान्, वसन्तोत्सवं-दीपोत्सवं सहैव च वीक्ष्य एवं प्रतिभाति यत् पुनः भारवर्षे चिरकालानन्तरं कालिदसस्य अलका इव विविधर्तूनां समवायः सञ्जातः वर्तते खलु। मन्ये अस्माकं समग्रो देश अपि अनेकैः वर्णैः विनिर्मितः विद्यते । एवमेव अस्माकं पाठकाः लेखकाश्चापि विविधप्रान्तीयाः विविधभाषाभाषिणः सन्तः अपि संस्कृतत्रिपथगामिन्यां सममेव अवगाहन्ते आत्मनश्च पुनीतान् मन्यन्ते । इतिकृत्वा नूनमेवेयं पत्रिका 'जाह्नवी' जाता न पुनः नाममात्रेण । तथापि नात्र गङ्गायां घोषः सारस्वत-निकेतनेऽत्र 'जाह्नवी' तस्मात् संशोधने प्रकाशने च क्वचित् स्खलनं प्रमादवशात् भवत्येव अस्तु क्षन्तुमर्हन्ति करुणावरुणालयास्सुधियः विचारेऽस्मिन् इति सादरं निवेद्यते । अस्मिन् अवसरे सारस्वत-निकेतनस्य सदस्यानामनुरोधमुररीकृत्य शिक्षणसंस्थायाः पुस्तकालयानां कृते subscription इत्यस्य कल्पना कृता खलु।

अन्तर्जालस्यप्रयोगकारणात् भूमण्डलीकृत इह **साम्प्रतिके** युगे कथं न एवमुपक्रमः स्यात् यत्र संस्कृतविषयमवलम्ब्य समस्तश्रोतसां उपलब्धता स्यात् **तस्मात् अस्माभिः** saravatniketanam.org इत्यत्र Sanskrit Junction इति काचित् कल्पना विहिता। वस्तुतः एतस्य प्रारम्भः 2009 तमे खीस्ताब्दे

[1] **प्रकाशकः सम्पादकश्च**

Sanskritam.ning.com इति नाम्ना जातः आसीत् परञ्च तकनीकिकारणात् प्रयोगोऽयं कस्यचित्कालस्य कृते संस्कृतजिज्ञासूनां कृते सुलभः नासीत् तस्मादयं जनः क्षन्तव्यः।

इदानीञ्च प्रो. पीयूषकान्तदीक्षित- श्रीमती सुमनदीक्षित- डा. राधावल्लभशर्मा-नारायणदत्तमिश्रादयो विपश्चिदपश्चिमाः साक्षात् सम्पादने-प्रकाशने-पुनर्वीक्षणे च स्वपरिश्रममर्पितवन्तः तदर्थं एतेभ्यः सुधीभ्यः भूयोभूयः कार्तज्ञ्यं व्याहरति जाह्नवी । अन्ये ये केऽपि जनाः अस्मिन् कर्मणि प्रत्यक्षाप्रत्यक्षतया स्वकीयम् अमूल्यं योगदानं समर्पितवन्तः तेभ्यो महनीयेभ्यः धन्यवादान् वितनोमि। संस्कृतं-संस्कृतिरनुस्यूतं भारतवर्षं पुनः विश्वगुरुपदवीमलङ्करोत्विति शुभाशयपुरस्सरं भवतां पुरस्तात् जाह्नव्याः अष्टादशाङ्कोऽयं सादरं सश्रद्धं समर्प्यते।

विद्वत्पांसुलः,

बिपिनकुमारझा

बलाहरः, हिमाचलप्रदेशः

16.5.14

****************************************************